## छाया बाहुल्ये । (२२/८२५)

'विभाषा सेनासुराच्छायाशालानिशानाम्' (२.४.२५/८२८) इति विभाषां वक्ष्यति । [1]नित्यार्थमिदं वचनम् । छायान्तस्तत्पुरुषो नपुंसकलिङ्गो भवति बाहुल्ये गम्यमाने । पूर्वपदार्थधर्मः[2] बाहुल्यम् । शलभादीनां हि [3]बहुत्वं गम्यते । शलभच्छायम् । [4]इक्षुच्छायम् । बाहुल्ये इति किम् ? [5]कुडयच्छाया ॥

## सभा राजाऽमनुष्यपूर्वा । (२३/८२६)

सभान्तस्तत्पुरुषो नपुंसकलिङ्गो भवति, सा चेत् सभा राजपूर्वा, अमनुष्यपूर्वा च भवति । [6]इनसभम् । [7]ईश्वरसभम् । इह कस्मान्न भवति, राजसभा? पर्यायवचनस्यैवे[8]ष्यते । तदुक्तम् –'जित्पर्यायस्यैव [9]राजाद्यर्थम्' (वा.१०) इति । अमनुष्यपूर्वा – रक्षःसभम् । [10]पिशाचसभम् । इह कस्मान् न भवति, काष्ठसभा ? अमनुष्यशब्दो रूढिरूपेण रक्षःपिशाचादिष्वेव वर्तते । राजाऽमनुष्यपूर्वा इति किम् ? देवदत्तसभा[11] ॥

## अशाला च । (२४/८२७)

अशाला च या सभा तदन्तस्तत्पुरुषो नपुंसकलिङ्गो भवति । सङ्घातवचनोऽत्र सभाशब्दो गृह्यते । स्त्री-सभम् । दासीसभम् । दासीसङ्घातः इत्यर्थः । अशाला इति किम् । अनाथसभा । अनाथकुटी इत्यर्थः ॥

## विभाषा सेनासुराच्छायाशालानिशानाम् । (२५/८२८)

सेना सुरा छाया शाला निशा इत्येवमन्तस्तत्पुरुषो नपुंसकलिङ्गो भवति विभाषा । ब्राह्मणसेनम्, ब्राह्मण-सेना । यवसुरम्, यवसुरा । कुडयच्छायम्, कुडयच्छाया । गोशालम्, गोशाला । श्वनिशम् । श्वनिशा ॥

## परवल्लिङ्गं द्वन्द्वतत्पुरुषयोः । (२६/८१२)

[12]समाहारद्वन्द्वे नपुंसकलिङ्गस्य विहितत्वाद् [13]इतरेतरयोगद्वन्द्वस्येदं ग्रहणम् । परस्य यल्लिङ्गं [14]तद् भवति द्वन्द्वस्य तत्पुरुषस्य च । उत्तरपदलिङ्गं द्वन्द्वतत्पुरुषयोर्विधीयते । कुक्कुटमयूर्याविमे । मयूरीकुक्कुटाविमौ । तत्पु-रुषस्य – अर्धं पिप्पल्याः अर्धपिप्पली । अर्धकोशातकी । [15]अर्धनखरञ्जनी ।

[१६३] द्विगुप्राप्तापन्नालंपूर्वगतिसमासेषु प्रतिषेधो वक्तव्यः । (म. भा. १.४७८)

[16]द्विगुः – पञ्चसु कपालेषु संस्कृतः [17]पुरोडाशः पञ्चकपालः[18] (४.२.१६/१२१७) (४.१.८८/१०८०) ।

---

1. नित्यार्थवचनम् ह. 2. वा इत्यधिकम् इ, अथ इत्यधिकम् ह. 3. बाहुल्ये गम्यमाने इ. 4. बहूनामिक्षूणां छाया इत्यधिकम् क, इक्षुच्छायम् नास्ति फ. 5. कुसच्छाया ब, आढयच्छाया फ. 6. राजपूर्वा इत्यधिकम् इ. 7. नास्ति इ. 8. उच्यते ह, वक्तव्यम् ब. फ. 9. राजाद्यर्थस्य ग्रहणम् ब. फ. राजार्थम् क. ड. 10. नास्ति ह. 11. चन्द्रगुप्तसभा इत्यधिकम् क. इ. फ, राजसभा इत्यधिकम् फ. 12. समाहारद्वन्द्वो नपुंसकलिङ्गो भवति अविहितत्वात् इ. 13. इतरेतरद्वन्द्वस्य फ. 14. तद् नास्ति फ. 15. नास्ति इ. फ. ह. 16. द्विगुः नास्ति फ. 17. पुरोडाशः नास्ति फ. 18. दशकपालः इत्यधिकम् अ.क.ड.